योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ००६

षष्ठः सर्गः ६

श्रीवसिष्ठ उवाच ।

अस्य देवाधिदेवस्य परस्य परमात्मनः ।

ज्ञानादेव परा सिद्धिर्न त्वनुष्ठानदुःखतः ।। १

अत्र ज्ञानमनुष्ठानं नत्वन्यदुपयुज्यते ।

मृगतृष्णाजलभ्रान्तिशान्तौ चेदं निरूपितम् ।। २

नह्येष दूरे नाभ्याशे नालभ्यो विषमे न च ।

स्वानन्दाभासरूपोऽसौ स्वदेहादेव लभ्यते ।। ३

किंचिन्नोपकरोत्यत्र तपोदानव्रतादिकम् ।

स्वभावमात्रे विश्रान्तिमृते नात्रास्ति साधनम् ।। ४

साधुसंगमसच्छास्त्रपरतैवात्र कारणम् ।

साधनं बाधनं मोहजालस्य यदकृत्रिमम् ।। ५

अयं सदेव इत्येव संपरिज्ञानमात्रतः ।

जन्तोर्न जायते दुःखं जीवन्मुक्तत्वमेति च ।। ६

श्रीराम उवाच ।

संपरिज्ञातमात्रेण किलानेनात्मनात्मना ।

पुनर्दोषा न बाधन्ते मरणाद्याः कदाचन ।। ७

देवदेवो महानेष कुतो दूरादवाप्यते ।

तपसा केन तीव्रेण क्लेशेन कियताथवा ।। ८

श्रीवसिष्ठ उवाच ।

स्वपौरुषप्रयत्नेन विवेकेन विकासिना ।

स देवो ज्ञायते राम न तपःस्नानकर्मभिः ।। ९

रागद्वेषतमःक्रोधमदमात्सर्यवर्जनम् ।

विना राम तपोदानं क्लेश एव न वास्तवम् ।। १०

रागाद्युपहते चित्ते वञ्चयित्वा परं धनम् ।

यदर्ज्यते तस्य दानाद्यस्यार्थास्तस्य तत्फलम् ।। ११

रागाद्युपहते चित्ते व्रतादि क्रियते च यत् ।

तद्दम्भः प्रोच्यते तस्य फलमस्ति मनाङ्ग च ।। १२

तस्मात्पुरुषयत्नेन मुख्यमौषधमाहरेत् ।

सच्छास्त्रसज्जनासङ्गौ संसृतिव्याधिनाशनौ ।। १३

अत्रैकं पौरुषं यत्नं वर्जयित्वेतरा गतिः ।

सर्वदुःखक्षयप्राप्तौ न काचिदुपपद्यते ।। १४

श्रृणु तत्पौरुषं कीदृगात्मज्ञानस्य लब्धये ।

येन शाम्यत्यशेषेण रागद्वेषविषूचिका ।। १५

यथासंभवया वृत्त्या लोकशास्त्राविरुद्धया ।

संतोषसंतुष्टमना भोगगन्धं परित्यजेत् ।। १६

यथासंभवमुद्योगादनुद्विग्नतया स्वया ।

साधुसंगमसच्छास्त्रपरतां प्रथमं श्रयेत् ।। १७

यथाप्राप्तार्थसंतुष्टो यो गर्हितमुपेक्षते ।

साधुसंगमसच्छास्त्रपरः शीघ्रं स मुच्यते ।। १८

विचारेण परिज्ञातस्वभावस्य महामतेः ।

अनुकम्प्या भवन्त्येते ब्रह्मविष्ण्विन्द्रशंकराः ।। १९

देशे यं सुजनप्राया लोकाः साधुं प्रचक्षते ।

स विशिष्टः स साधुः स्यात्तं प्रयत्नेन संश्रयेत् ।। २०

अध्यात्मविद्या विद्यानां प्रधानं तत्कथाश्रयम् ।

शास्त्रं सच्छास्त्रमित्याहुर्मुच्यते तद्विचारणात् ।। २१

सच्छास्त्रसत्संगमजैर्विवेकै-

स्तथा विनश्यन्ति बलादविद्याः ।

यथा जलानां कतकानुषङ्गा-

द्यथा जनानां मतयोऽपि योगात् ।। २२

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपाये उत्पत्तिप्रकरणे मुमुक्षुप्रयत्नोपदेशो नाम षष्ठः सर्गः ।। ६ ।।